श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीदेवीभागवते इन्द्र कृतं

# ॥ श्री महालक्ष्मीस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री महालक्ष्मीस्तोत्रम् ॥

पुरन्दर उवाच

नमः कमलवासिन्यै नारायण्यै नमो नमः।
कृष्णप्रियायै सततं महालक्ष्मै नमो नमः॥ 1 ॥

पद्मपत्रेक्षणायै च पद्मास्यायै नमो नमः।
पद्मासनायै पद्मिन्यै वैष्णव्यै च नमो नमः॥ 2 ॥

सर्वसम्पत्स्वरूपिण्यै सर्वाराध्यै नमो नमः।
हरिभक्तिप्रदात्र्यै च हर्षदात्र्यै नमो नमः॥ 3 ॥

कृष्णवक्षःस्थितायै च कृष्णेशायै नमो नमः।
चन्द्रशोभास्वरूपायै रत्नपद्मे च शोभने॥ 4 ॥

सम्पत्यधिष्ठातृदेव्यै महादेव्यै नमो नमः।
नमो वृद्धिस्वरूपायै वृद्धिदायै नमो नमः॥ 5 ॥

वैकुण्ठे या महालक्ष्मीर्या लक्ष्मीः क्षीरसागरे।
स्वर्गलक्ष्मीरिन्द्रगेहे राजलक्ष्मीर्नृपालये॥ 6 ॥

गृहलक्ष्मीश्च गृहिणां गेहे च गृहदेवता।
सुरभिस्सागरे जाता दक्षिणा यज्ञकामिनी॥ 7 ॥

अदितिर्देवमाता त्वं कमला कमलालया।
स्वाहा त्वं च हविर्दाने कव्यदाने स्वधा स्मृता॥ 8 ॥

त्वं हि विष्णुस्वरूपा च सर्वाधारा वसुन्धरा।
शुद्धसत्वस्वरूपा त्वं नारायणपरायणा॥ 9 ॥

क्रोधहिंसावर्जिता च वरदा शारदा शुभा।
परमार्थप्रदा त्वं च हरिदास्यप्रदा परा॥ 10 ॥

यया विना जगत्सर्वं भस्मीभूतमसारकम्।
जीवन्मृतं च विश्वं च शश्वत्सर्वं यया विना॥ 11 ॥

सर्वेषां च परा माता सर्वबान्धवरूपिणी।
धर्मार्थकाममोक्षाणां त्वं च कारणरूपिणी॥ 12 ॥

यथा माता स्तनान्धानां शिशूनां शैशवे सदा।
तथा त्वं सर्वदा माता सर्वेषां सर्वरूपतः॥ 13 ॥

मातृहीनःस्तनान्धस्तु स च जीवति दैवतः।
त्वया हीनो जनः कोऽपि न जीवत्येव निश्चितम्॥ 14 ॥

सुप्रसन्नस्वरूपा त्वं मां प्रसन्ना भवाम्बिके।
वैरिग्रस्तं च विषयं देहि मह्यं सनातनि॥ 15 ॥

अहं यावत्त्वया हीनो बन्धुहीनश्च भिक्षुकः।
सर्वसम्पद्विहीनश्च तावदेव हरिप्रिये॥ 16 ॥

ज्ञानं देहि च धर्मं च सर्वसौभाग्यमीप्सितम्।
प्रभावं च प्रतापं च सर्वाधिकारमेव च॥ 17 ॥

जयं पराक्रमं युद्धे परमैश्वर्यमेव च।
इत्युक्त्वा च महेन्द्रश्च सर्वैः सुरगणैः सह॥ 18 ॥

प्रणनाम साश्रुनेत्रो मूर्ध्ना चैव पुनः पुनः।
ब्रह्मा च शङ्करश्चैव शेषो धर्मश्च केशवः॥ 19 ॥

सर्वे चक्रुः परिहारं सुरार्थे च पुनः पुनः।
देवेभ्यश्च वरं दत्वा पुष्पमालां मनोहराम्॥ **20**॥

केशवाय ददौ लक्ष्मीः सन्तुष्टा सुरसंसदि।
ययुर्देवाश्च सन्तुष्टाः स्वं स्वं स्थानं च नारद॥ **21**॥

देवी ययौ हरेः स्थानं हृष्टा क्षीरोदशायिनः।
ययतुश्चैव स्वगृहं ब्रह्मेशानौ च नारद॥ **22**॥

दत्वा शुभाशिषं तौ च देवेभ्यः प्रीतिपूर्वकम्।
इदं स्तोत्रं महापुण्यं त्रिसन्ध्यं यः पठेन्नरः॥ **23**॥

कुबेरतुल्यः स भवेद्राजराजेश्वरो महान्।
पञ्चलक्षजपेनैव स्तोत्रसिद्धिर्भवेन्नृणाम्॥ **24**॥

सिद्धस्तोत्रं यदि पठेन्मासमेकं तु सन्ततम्।
महासुखी च राजेन्द्रो भविष्यति न संशयः॥ **25**॥

॥ श्री महालक्ष्मीस्तोत्रं समाप्तम्॥